National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(58): 231-232
© 2025 NJHSR
www.sanskritarticle.com

**डा. भारतभूषणरथः**
आसोसिएट् प्रोफेसर, साहित्यविभागः,
उपनिर्देशकः, दूरशिक्षानिर्देशालयः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः – आ.प्र

**Correspondence:**
**डा. भारतभूषणरथः**
आसोसिएट् प्रोफेसर, साहित्यविभागः,
उपनिर्देशकः, दूरशिक्षानिर्देशालयः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः – आ.प्र

# आचार्य-अभिनवगुप्तविरचिते परमार्थसारे शिवतत्त्वम्

**डा. भारतभूषणरथः**

दशमशतकसमुद्भवः आचार्यः अभिनवगुप्तः शैवाचार्येष्वन्यतमः वरिष्ठः। अभिनवगुप्तः दार्शनिकः परन्तु अलङ्कारशास्त्रे तस्य पाण्डित्यं तं विशिष्टालङ्कारिकरूपेणापि सम्मानयति। नाट्यशास्त्रमधीकृत्य अभिनवभारती टीका तथा च ध्वन्यालोकस्य लोचनटीका अभिनवगुप्तस्य अलङ्कारशास्त्रे योगदानम्। आचार्यः मम्मटः तस्य सम्मानेन लिखति – श्रीमदाचार्याभिनवगुप्तपादाः। इति। अयम् अभिनवगुप्तः काश्मीरप्रदेशस्य शैवाचार्येषु अग्रगण्यः आसीत् तथा प्रत्यभिज्ञादर्शनस्य परमाचार्यरुपेण परिचयं प्राप्नोति। तस्य तन्त्रालोके ग्रन्थे प्रत्यभिज्ञादर्शनस्य सूक्ष्मविचारः वर्तते। गुरोः उत्पलाचार्यस्य ईश्वरप्रत्यभिज्ञाग्रन्थस्य ईश्वरप्रत्यभिज्ञाविमर्शिनी इति टीकां लिखितवान् अभिनवगुप्तः। शैवदर्शने तस्य पाण्डित्यं पुरस्कृत्य परममाहेश्वचार्यः इति उपाधिना सः विभूषितः आसीत्। अभिनवगुप्तपादस्य परमार्थसारः इति अपरः ग्रन्थविशेषः वर्त्तते। अयं ग्रन्थः सुकुमारमतीनां शिवतत्त्वाबवोधने परमसहायकः। केवलं शतकारिकासमायुक्तोऽयं ग्रन्थः शैवसिद्धान्तस्य कुञ्चिका इति विद्वांसः अभिप्रयन्ति। सांख्यशास्त्रस्य आधारकारिकाम् आधाररूपेण स्वीकृत्य अस्य ग्रन्थस्य संरचना। ग्रन्थस्यास्य मङ्गलपद्ये अभिनवगुप्तः शिवस्य शरणं प्रयाति। स च शिवः सजीवे नीर्जीवे च परिव्याप्तः इति अभिनवगुप्तस्य विचारः। अतः लिखति –

**परं परस्थं गहनादनादिम् एकं निविष्टं बहुधा गुहासु।**
**सर्वालयं सर्वचराचरस्थं त्वामेव शम्भुं शरणं प्रपद्ये।।** परमार्थसारः – 1

अर्थात् गहनात् परस्थं परम् अनादिम् एकं, बहुधा गुहासु निविष्टं सर्वालयं सर्वं चर अचरस्थं त्वां शंभुम् एव शरणं प्रपद्ये।

अत्र गहनशब्दस्य अर्थः माया। परस्थं भवति मायातः दूरे स्थितम् इति। परं अर्थात् अत्युच्चस्थानम्। अनादिम् आद्यन्तरहितम्। यद्यपि एकं तथापि विविधस्वरूपं धृत्वा सर्वालयेषु अर्थात् सर्वेषां हृदि निवशति भगवान् शिवः। स च शिवः चराचरेषु व्याप्तः। अहं तस्य शिवस्य शरणागतः इति अभिनवगुप्तपादस्य समर्पणभावः। द्वितीये पद्ये अभिनवगुप्तः अस्य ग्रन्थस्य रचनायाः उद्देश्यं वर्णयति। यत्र संसारदुःखदावानलात् मुक्तिः कथं सम्भवतीति उद्देश्यं दृष्टिपथमायाति। मुक्तिः इति शब्दः परमार्थ इति पारिभाषिके शब्दे व्यवह्रीयतेऽत्र। यथा –

**गर्भाधिवासपुवेकमरणान्तकदुःखचक्रविभ्रान्तः।**
**आधारं भगवन्तं शिष्यः पप्रच्छ परमार्थम्॥** परमार्थसारः - 2॥

कश्चित् भगवत्प्रसादात् समुत्पन्नवेराग्यः संसारात् वरिरतमतिः शिष्यः, गुरोः शासनीयोऽस्मि इति मत्वा, सद्गुरुम् "आधारं भगवन्तं शेषाख्यं मुनिं शेषनागः इत्यर्थः सम्यक् आराध्य परमार्थोपदेशरूपं पृष्टवान्। तदा तं शेष्यं विगलितान्तःकरणं मत्वा, सांख्यनयोक्तोपदेशानुसारेण प्रकृतिपुरुषविवेकज्ञानात् परब्रह्मावाप्तिः इत्येवम् एतं शिष्यं प्रोक्तवान्। तत्र च आधारकारिका एव आधारः। स एव ब्रह्मोपदेशः सर्वजनम् अनुग्रहीतुं आचार्य-अभिनवगुप्तपादः शैवसिद्धान्तेति नाम्ना प्रतिपादितवान्। वदति यथा –

**आधारकारिकाभिस्तं गरुरभिभाषते स्म, तत्सारम्।**
**कथयत्याभिनवगुप्तः शिवशासनदृष्टियोगेन॥** परमार्थसारः - 3॥

स्वात्मीयो असाधारणवैभववशाद् प्रभुणा अण्डचतुष्टयं निर्मितम्। यथा – शक्तिः, माया, प्रकृतिः तथा पृथ्वी। सृष्टिप्रक्रियायाः प्रथमं रूपम् इदमिति अभिनवगुप्तपादस्य आशयः। तदनन्तरं देहधारीणः जीवाः

तथा पशुभावेन स्वयं शिवः समुद्भुतः। अतः लिखति –

**निजशक्तिवैभवभराद् अंडचतुष्टयमिदं विमागेन**

**शक्तिर्मया प्रकृतिः पृथ्वी चेति प्रभावितं प्रभुणा ॥**

**भोक्ता च तत्र देही शिव एव गृहीतपशुभावः**।। परमार्थसारः – 4,5॥

ईश्वरः अपि विविधस्वरूपं धृत्वा संसारं पालयति। तत्र च देव-मानव-पशु तथा वृक्ष सरूपेण ईश्वरः सर्वत्र प्रतिभाति। तद् यथा –

**नानाविधवर्णानां रूपं धत्ते यथामलः स्फटिकः ।**

**सुरमानुषपशुपादपरूपत्वं तद्वदीशोऽपि ॥ 6 ॥**

**आदर्शे मलरहिते यद् वदनं विभाति तद्वदयम् ।**

**शिवशक्तिपातविमले धीतत्त्वे भाति भारूपः**।। 9॥

यथा मालिन्यरहिते दर्पणे निर्विशेषरूपादिगुणगणयुक्तं मुखं चकास्ति तथा शिवस्य अनुग्रहशक्त्या आत्मा धीतत्त्वरूपेण भाति। तत्र विश्वे षड्त्रिंशत् तत्त्वं वर्तते। यत् परमात्मनि द्रष्टुं शक्यते। उक्तं - यत्परतत्वं तस्मिन् विभाति षट् त्रिंशदात्म जगत्।।11।। अयं परमेश्वरः पञ्चशक्ति-समायुक्तो वर्त्तते। यथा – चित्, आनन्दः, इच्छा, ज्ञानम् तथा क्रिया। तत्र पञ्चशक्तीनां रूपं यथा – चित् – शिवः, आनन्दः – शक्तिः, इच्छा – शक्तिः, ज्ञानम् – सदाशिवः, क्रिया – ईश्वरः। यथा -

**शिवशक्तिसदाशिवतामीश्वर-विद्यामयीं च तत्त्वदशाम् ।**

**शक्तीनां पञ्चानां विभक्तभावेन भासयति** ।।14।

शिवस्य स्वातन्त्र्यं तथा मायाशक्तिः का इति लिखति कविः -

**परमं यत् स्वातन्त्र्यं दुर्घटसंपादनं महेशस्य ।**

**देवी मायाशक्तिः स्वात्मावरणं शिवस्यैतत्** ।।15।।

स्वात्मावरणं नाम आत्मरूपगोपनमिति। शिवः स्वस्वरूपं गोपनं कृत्वा दुर्घटसंपादनं करोति। दुर्घटसंपादनं नाम असभवं सम्भवरूपेण प्रकटयतीति। अपि च शिवस्य मायाशक्तिः भवति देवी। एवं शिवतत्त्वं सम्यग् उपस्थापनं कृत्वा आचार्यः अभिनवगुप्तः सृष्टेः विविधतत्त्वानां विचारं करोति। तत्र दर्शनशास्त्रस्य परम वेत्ता अभिनवगुप्तः भारतीयदार्शनिकं सिद्धान्तं सम्यग् विवेचयति। तत्रापि सांख्यदर्शनस्य प्रभावः अस्मिन् परमार्थसारे ग्रन्थे वहुधा परिलक्षते। संप्रति तदालोच्यते। पञ्च कर्मेन्द्रियाणि तथा पञ्च ज्ञानेन्द्रियाणि -

**श्रोत्रं त्वगक्षि रसना घ्राणं बुद्धीन्द्रियाणि शब्दादौ ।**

**वाक् पाणिपादपायूपस्थं कर्मेन्द्रियाणि पुनः** ।। 20।।

श्रोत्रं – कर्ण, त्वक् – त्वचा, अक्षि – नेत्र, रसना – जिह्वा, घ्राणम् – निसाका इति पञ्च ज्ञानेन्द्रियाणि तथा वाक् – वाणी, पाणि – हस्त, पाद – पादः, पायुः, उपस्थम् इति पञ्च कर्मेन्द्रियाणि अपि ईश्वरस्य शरीरावयवानि इति अभिनवगुप्तपादः।

**पञ्चतन्मात्राणि –**

**एषां ग्राह्यो विषयः सूक्ष्मः प्रविभागवर्जितो यः स्यात् ।**

**तन्मात्रपञ्चकं तत् शब्दः स्पर्शो महो रसो गन्धः ॥** 21।।

ज्ञानेन्द्रियाणां ग्राह्य विषयः पञ्च तन्मात्राणि। यथा – शब्दः, स्पर्शः, रूपम्, रसः तथा गन्धः।

**पञ्चमहाभूतानि –**

पञ्च तन्मात्राणां संसर्गवशाद् आकाशः, वायुः, अग्निः, जलं तथा पृथ्वी इति पञ्च महाभूतानां सृष्टिः। यथा -

**एतत्संसर्गवशात् स्थूलो विषयस्तु भूतपंचकताम् ।**

**अभ्येति नभः पबनस्तेजः सलिलं च पृथ्वी च**।। 22।।

**विश्वब्रह्माण्डस्य मूलम् ईश्वरः -**

**रसफाणितशर्करिकागुड-खंडाद्या यथेक्षुरस एव ।**

**तद्वदवस्थाभेदाः सर्वे परमात्मनः शंभोः** ॥26॥

यथा फाणितः, गुडः तथा खाण्डसारः इक्षुरसस्यैव अवस्थाभेदः तथा स एव भगवान् सर्वस्य स्वात्मभू। यथाह श्रीशंभुभट्टारकः –

**एको भावः सर्वभावस्वभावः सर्वे भावा एकभावस्वभावाः।**

**एको भावस्तत्त्वतो येन दृष्टः सर्वे भावास्तत्त्वतस्तेन दृष्टाः**।।

**विविधमतखण्डनम् -**

**विज्ञानान्तर्यामिप्राणविराड् देहजातिपिण्डान्ताः ।**

**व्यवहारमात्रमेतत् परमार्थेन तु न सन्त्येव** ॥26।।

विज्ञानवादः, अन्तर्यामिवादः, प्राणवादः, विश्वात्मावादः, सत्तात्मावादः तथा पिण्डात्मावादः केवलं व्यवहारमात्रम्। परन्तु तत्त्वतः एतेषां न काऽपि सत्ता वर्त्तते।

**रज्वा सर्पज्ञानम् -**

**रज्वां नास्ति भुजङ्गस्त्रासं कुरुते च मृत्युपर्यन्तम्।**

**भ्रान्तेर्महती शक्तिर्न विवेक्तुं शक्यते नाम**॥27॥

यथा रज्वां सर्पज्ञानं तथैव जीवने मृत्युभयं भ्रान्तिरूपेण तिष्ठति।

**समानताभावः -**

**तद्वद् धर्माधर्मस्वर्निरयोत्पत्तिमरणसुखदुःखम् ।**

**वर्णाश्रमादि चात्मन्यसदपि विभ्रमबलाद्भवति**॥29॥

अर्थात् पुण्य – पाप – स्वर्ग – नर्क – मृत्यु – सुख – दुःख – वर्ण – आश्रमेत्यादयः विषयाः भ्रान्तिः एव। परन्तु भ्रान्त्या सत्यम् इति अनुमीयते।

**शिवत्वप्राप्तिः -**

**परमार्थमार्गमेनं झटिति यदा गुरुमुखात्समभ्येति ।**

**अतितीव्रशक्तिपातात् तदेव निर्विघ्नमेव शिवः** ।। 96।।

तीव्र-ईश्वरानुग्रहः तथा सद्गुरोः उपदेशेन मोक्षश्रमार्गस्य प्राप्तिर्भवति। तदानिं निर्विघ्नं ईश्वरप्राप्तिर्भवति इति आचार्यः निगति। अनेन प्रकारेण विविध सदुपदेशपरकैः उपायैः आचार्यः अभिनवगुप्तः भगवतः शिवस्य स्वरूपं तथा संसारे शिवस्य वैशिष्ट्यं प्रतिपादयति। अन्ते स्वात्मसमर्पणपूर्वकं लिखति –

**आर्याशतेन तदिदं संक्षिप्तं शास्त्रसारमतिगूढम् ।**

**अभिनवगुप्तेन मया शिवचरणस्मरणदीप्तेन** ।। 105।।

**सहायकग्रन्थसूची –**


1. परमार्थसारः – आचार्यः अभिनवगुप्तः – मुनसिराम मनोहरलाल पब्लिसर्स - 1977
2. The Kashmir Series of Texts and Studies – 7th Volume – H H Sri Pratap singh – Jammu & Kashmir State – 1916
3. सांख्यकारिका – ईश्वरकृष्णः – भापतीयविद्याप्रकाशनम् – नवदेहल्ली – 2015
4. काव्यप्रकाशः – आचार्यः मम्मटः – नागप्रकाशनम् – नवदेहल्ली - 2007